श्रीमन्नारायणपण्डिताचार्यविरचिता

# श्रीमन्मणिमञ्जरी

॥ श्री गुरुभ्यो नमः हरिः ॐ ॥

## अथ प्रथमः सर्गः

वन्दे गोविन्दमानन्दज्ञानदेहं पतिं श्रियः ।
श्रीमदानन्दतीर्थार्यवल्लभं परमक्षरम् ॥ १ ॥

ससर्ज भगवानादौ त्रीन्गुणान् प्रकृतेः परः ।
महत्तत्वं ततो विष्णुः सृष्टवान् ब्रह्मणस्तनुम् ॥ २ ॥

महत्तत्वादहङ्कारं ससर्ज शिवविग्रहम् ।
दैवान्देहान्मनः खानि खं च स त्रिविधात्ततः ॥ ३ ॥

आकाशादसृजद्वायुं वायोस्तेजो व्यजीजनत् ।
तेजसः सलिलं तस्मात् पृथिवीमसृजद्विभुः ॥ ४ ॥

ततः कूटस्थमसृजद्विधिं ब्रह्माण्डविग्रहम् ।
तस्मिंस्तु भगवान् भूयो भुवनानि चतुर्दश ॥ ५ ॥

तात्विकानथ दैवान् को वैराजः पुरुषोऽसृजत् ।
तथैव परमान् हंसान् सनकादींश्च योगिनः ॥ ६ ॥

असुरान् दोषरूपानप्यविद्यां पञ्चपर्वणीम् ।
वर्णाश्रमविशेषांश्च धर्मक्लृप्तिं च सोऽसृजत् ॥ ७ ॥

मरीच्यत्र्यादयः पुत्रा अभूवन् परमेष्ठिनः ।
मरीचेः कश्यपो जज्ञे वामनस्य पिता वटोः ॥ ८॥

प्रजाः सिसृक्षुर्विविधा अवहत् कश्यपो दितिम् ।
अदितिं च दनुं कद्रुं कीकसां विनतामपि ॥ ९॥

दित्यां ततोऽभवन् दैत्या अदित्यां च सुराः पुनः ।
दनौ तु दानवाः कद्रौ नागा नाना विषोल्बणाः ॥ १०॥

कीकसायां यातुधाना विनतायां तु पक्षिणः ।
महावीर्याः सुता आसन् कश्यपस्य महात्मनः ॥ ११॥

मानवानां पिता जज्ञे आदित्यात् कश्यपात्मजात् ।
मनुर्नाम महाप्राज्ञ एतन्मन्वन्तरेश्वरः ॥ १२॥

तस्य घ्राणादभूच्छ्रीमानिक्ष्वाकुः क्षुवतो मनोः ।
तपस्तस्त्वा विरिञ्चात्स लेभे रङ्गेश्वरं हरिम् ॥ १३॥

विकुक्षिः समभूत्तस्य पुरञ्जयपुरोगमाः ।
तदन्वये व्यजायन्त शूरा राजर्षयः परे ॥ १४॥

तस्मिन् वंशे दशरथो बभूवात्यन्तभाग्यवान् ।
सोऽर्चन् वैमानिकं विष्णुं ररक्ष महतीं महीम् ॥ १५॥

तस्मिन् काले सुराः सर्वे महाराक्षसपीडिताः ।
दुग्धाब्धिशायिनं विष्णुं शरण्यं शरणं ययुः ॥ १६॥

त आदिष्टाः श्रियः पत्या जज्ञिरे क्षितिमण्डले ।
शाखामृगादिभावेन हनुमान् मरुतोऽभवत् ॥ १७॥

अभयाय सतां हत्यै राक्षसानां ततो हरिः ।
रामनामा दशरथात् कौसल्यायामजायत ॥ १८॥

ततो लक्ष्मणशत्रुघ्नौ सुमित्रायां बभूवतुः ।
कैकेय्यां भरतो जज्ञे सदा शुभरतो नृपात् ॥ १९॥

अभ्यवर्ध्यन्त सम्यञ्चः कुमाराः सुकुमारकाः ।
चतुर्भिश्चतुरैः पुत्रैः पितार्थैरिव निर्बभौ ॥ २०॥

विश्वामित्रस्ततो यज्ञनिघ्नतो राक्षसेश्वरान् ।
निहन्तुमनयन्नाथं रामदेवं सलक्ष्मणम् ॥ २१॥

अटव्यां ताटकां हत्वा स सिद्धाश्रममेयिवान् ।
विधूय यज्ञविघ्नांश्च विदेहविषयं ययौ ॥ २२॥

राजाद्यैः पूजितः सोऽथ विभज्य धनुरैश्वरम् ।
जानकीमलभिष्टोच्चैः स्तूयमानः सुरेश्वरैः ॥ २३॥

गच्छन् देव्या सहायोध्यां सर्वशिष्टः सहानुजः ।
कविकाव्ययुतज्योत्स्नाकान्तवत् स व्यरोचत ॥ २४॥

प्रविश्य नगरीं तत्र प्रवन्द्य पितरं तथा ।
मातॄश्च पूजितः सर्वैः स रेमे सुखचित्तनुः ॥ २५॥

रामराज्याभिषेकाय दध्रे दशरथो मनः ।
निजघ्ने स तु कैकेय्या मत्सुतो गामवेदिति ॥ २६॥

रामदेवः ततः सीतालक्ष्मणाभ्यां समन्वितः ।
वनं प्रति ययौ हन्तुमशेषानपि राक्षसान् ॥ २७॥

ध्वस्तकर्णां विघोणां च कारयामास राक्षसीम् ।
लङ्केशभगिनीं रामो लक्ष्मणेनानुजन्मना ॥ २८॥

रामविप्रकृतः क्रव्यात् प्रतिकर्मचिकीर्षया ।
आजगाम सहानीकः खरो दूषणसंयुतः ॥ २९॥

तान् जघान रमानाथो रामो राजीवलोचनः ।
लीलयैव परानन्दः सुरकार्यार्थसिद्धये ॥ ३०॥

रामः पुरस्तात् परतोऽपि रामो रामः परं दिक्षु विदिक्षु रामः ।
रामैरनन्तैरिति विश्वरूपो निघ्नन्नरातीन् विरराज रामः ॥ ३१॥

॥ इति श्रीमन्मणिमञ्जर्यां प्रथमः सर्गः ॥

## अथ द्वितीयः सर्गः

ततो दूरं गते रामे रावणः सहलक्ष्मणे ।
सीतेयं नीयत इति मत्वा निन्ये तदाकृतिम् ॥ १॥

रामान्तिके स्थिता देवी न मन्दैः समदृश्यत ।
रूपान्तरेण कैलासं गता नित्यावियोगिनी ॥ २॥

नित्यं पश्यन्निजां देवीं पूर्णसन्तोषसम्भृतः ।
रामो न दृश्यते देवीत्यभूत् सङ्कटवानिव ॥ ३॥

प्रभञ्जनसुतः श्रीमानाञ्जनेयो निरञ्जनः ।
ननाम भक्तिसम्पूर्णो रामं राजीवलोचनम् ॥ ४॥

रामस्वामिन्नमस्तुभ्यं दुष्टान् जहि निजानव ।
निर्दुःखानन्दलीलात्मन्नित्यस्तौत् स निजं गुरुम् ॥ ५॥

स वनान्तरमासाद्य रामः सुग्रीवमैक्षत ।
तेन सख्यं समासाद्य निजघान तदग्रजम् ॥ ६॥

ततः सुग्रीवसन्दिष्टा वानरा दिक्षु सर्वशः ।
प्रससुर्निपुणा वीराः सीतामार्गणतत्पराः ॥ ७॥

दक्षिणां ककुभं गत्वा हनुमानम्भसां निधिम् ।
अतिलङ्घ्य ततो लङ्कां सीताकृतिमवैक्षत ॥ ८॥

रामाङ्गुलीयकं देव्यै दत्वा चूडामणिं ततः ।
सङ्गृह्य जानकीं भक्त्या नत्वासावारुहत्तरुम् ॥ ९॥

वनं विशकलय्योच्चैः राक्षसानक्षपूर्वकान् ।
निहत्य मारुतिर्लङ्कामदहत् पुच्छवह्निना ॥ १०॥

ततो रत्नाकरं तीर्त्वा वानरेन्द्रैः सभाजितः ।
दत्वा चूडामणिं धन्यः प्राप्य रामाय सोऽनमत् ॥ ११॥

रामो हनुमता सार्धं लक्ष्मणेन च धीमता ।
सुग्रीवेण ससैन्येन कीनाशहरितं ययौ ॥ १२॥

स सेतुं दक्षिणाम्भोधौ बन्धयामास मर्कटैः ।
ससैन्यो वर्त्मना तेन नक्तञ्चरपुरं ययौ ॥ १३॥

निजघ्नू राक्षसानीकं वानराः सहलक्ष्मणाः ।
हनुमान् भगवत्प्रीत्यै जघानातिबलान् रिपून् ॥ १४ ॥

सो जीवयन्महारक्षो मोहितान् सर्ववानरान् ।
गन्धमादनमानीय तद्गतौषधिवायुना ॥ १५ ॥

असङ्ख्यान् राक्षसान् हत्वा कुम्भकर्णं च रावणम् ।
रामो विभीषणं रक्षः साम्राज्ये सोऽभ्यषेचयत् ॥ १६ ॥

अशोकमूलमासाद्य दर्शयामास जानकीम् ।
नित्यावियोगिनीं देवीं रामो मन्ददृशामपि ॥ १७ ॥

हनुमत्प्रमुखैः सार्धं देव्या च पुरुषोत्तमः ।
आरुह्य पुष्पकं रामो जगाम नगरीं निजाम् ॥ १८ ॥

भरतो भक्तिभरितो राममभ्येत्य निर्वृतः ।
पपात पादयोस्तस्य कृष्णस्येव श्वफल्कजः ॥ १९ ॥

तमुत्थाप्य परिष्वज्य राघवोऽन्तःपुरं गतः ।
सम्पूजितो जनैः सर्वैर्जननीमभ्यवन्दत ॥ २० ॥

रामो राज्याभिषिक्तः सन् शशास जगतीं प्रभुः ।
धर्मानशिक्षयत्पूर्णो बुभुजे सम्पदः सुखी ॥ २१ ॥

सनकादींश्च तद्वंश्यान् मुनीनन्यांश्च मारुतिः ।
रामान्तिके श्रुतिव्याख्याविशेषान् समशिक्षयत् ॥ २२ ॥

सुराणकांस्तमो नेतुं तत्याजेव स जानकीम् ।
व्याप्तत्वान्निरवद्यत्वात् तस्यास्त्यागः कथं भवेत् ॥ २३ ॥

स्वात्मानं यज्ञपुरुषं यज्ञेनायजताथ सः ।
तत्रागता सती सीता वेद्यामन्तर्दधे किल ॥ २४ ॥

धर्मं साङ्ख्यं च योगं च वर्तयामास राघवः ।
प्रावोचन्मरुतः सूनुः सम्पदो ननृतुस्तदा ॥ २५ ॥

प्रकृत्या परमा हंसा ब्रह्मणो मानसाः सुताः ।
सनकाद्यास्ततः श्रुत्वा व्याचख्युस्तत्त्वमञ्जसा ॥ २६ ॥

नमो रामाय रामाय राम राम नमोऽस्तु ते ।
रामः स्वामी गती राम इति लोका विचुक्रुशुः ॥ २७॥

देवो जिगमिषुर्धाम स्वीयमभ्यर्थितः सुरैः ।
दुग्धाब्धिं प्रययौ शेषो लक्ष्मणो रामचोदितः ॥ २८॥

समायात समायात ये ये मोक्षपदेच्छवः ।
एवमाघोषयद्रामो दूतैर्दिक्षु समस्तशः ॥ २९॥

अथोत्तरां दिशं देवः प्रतस्थे सह सीतया ।
वानराद्यैर्नराद्यैरप्यसङ्ख्यैर्जन्तुभिर्वृतः ॥ ३०॥

तेषां मोक्षपदं दत्वाऽभ्यनुज्ञाप्य मरुत्सुतम् ।
राघवः सीतया सार्धं विवेश स्वं परं पदम् ॥ ३१॥

सत्येन भक्त्या च विरक्तिमत्या मत्या च धृत्या च तपस्यया च ।
हा राम रामेति सदोपगायन् प्राभञ्जनिः किम्पुरुषेषु रेमे ॥ ३२॥

॥ इति श्रीमन्मणिमञ्जर्यां द्वितीयः सर्गः ॥

## अथ तृतीयः सर्गः

हिमांशोरत्रिपुत्रस्य बुधोनामसुतोऽभवत् ।
पुरूरवामहाराजस्तस्य पुत्रो व्यजायत ॥ १॥

तस्यायुरभवत्पुत्रो नहुषस्तस्य नन्दनः ।
ययातिरभवत्तस्य नन्दनो बलवीर्यवान् ॥ २॥

देवयानीं च शर्मिष्ठां स उवाह प्रिये उभे ।
प्रथमोशनसः पुत्री द्वितीया वृषपर्वणः ॥ ३॥

यदुं च तुर्वसुं राजा देवयान्यामजीजनत् ।
द्रुत्युं चानुं च पूरुं च शर्मिष्ठायामजीजनत् ॥ ४॥

यदोर्वंशे तु राजानः कार्तवीर्यपुरोगमाः ।
बभूवुर्भगवद्भक्तास्तपोज्ञानपरायणाः ॥ ५॥

पुरोर्वंशे तु राजान आसन् दौष्यन्तिपूर्वकाः ।
तेषां कीर्त्या च विक्रान्त्या समस्ताः पूरिता दिशः ॥ ६ ॥

भूभारहरणापेक्षास्तस्मिन् काले दिवौकसः ।
दुग्धाब्धिशायिनं विष्णुं शरण्यं शरणं ययुः ॥ ७ ॥

विप्रक्षत्रादिभावेन त आदिष्टाः सुरादयः ।
बभूवुर्भगवत्सेवां विधित्सन्तः समस्तशः ॥ ८ ॥

वरुणः शन्तनुर्नाम पुरोर्वंशे व्यजायत ।
विचित्रवीर्यस्तस्यासीत् पुत्रश्चित्राङ्गदानुजः ॥ ९ ॥

धृतराष्ट्रश्च पाण्डुश्च इति पुत्रौ बभूवतुः ।
पाण्डोः कुन्ती च माद्री च द्वे भार्ये धर्मकोविदे ॥ १० ॥

स पाण्डुर्मुनिशापेन स्त्रीसङ्गमसुखं जहौ ।
भर्त्राज्ञया सुतं कुन्ती धर्माल्लेभे युधिष्ठिरम् ॥ ११ ॥

धृतराष्ट्रस्य गान्धार्यां आसन् दुर्योधनादयः ।
वधाय मारुतस्तेषां भीमं कुन्त्यामजीजनत् ॥ १२ ॥

सा लेभे वासवाज्जिष्णुं यमौ माद्री च दस्त्रयोः ।
वने वर्धन्त वत्सास्ते पाण्डुना परिरक्षिताः ॥ १३ ॥

एवं पाञ्चालबाह्लीका अवर्धन्त महाबलाः ।
आहुकाद्यादवादुग्रसेनोऽभूद्देवकस्तथा ॥ १४ ॥

देवकस्य सुता जज्ञे देवकी देवसम्मता ।
वसुदेव उवाहैनां यादवः शूरनन्दनः ॥ १५ ॥

तत्र प्रादुरभूद्देवः परमात्मा सनातनः ।
दम्पत्योरनयोराशाः पूरयन् सुरकार्यवान् ॥ १६ ॥

वसुदेवस्य रोहिण्यां ततः पूर्वमजायत ।
अनन्तो बलवत्वेन बलभद्र इति श्रुतः ॥ १७ ॥

ज्ञानानन्दतनुं श्यामं[1] शङ्खचक्रगदाधरम् ।

[1] पद्म

व्यक्तमात्रं हरिं दृष्ट्वा तुष्टावानकदुन्दुभिः ॥ १८॥

स्वाज्ञया स व्रजं नीतः कंसाद्भीतेन शौरिणा ।
शिशुरूपो यशोदायाः शायितः शयने शनैः ॥ १९॥

चण्डिकां तत्क्षणोद्भूतां नीत्वा यादवनन्दनः ।
देवक्याः शयने न्यस्य पूर्ववद्बन्धमाययौ ॥ २०॥

तां कन्यां कंस आनीय निहन्तुमुपचक्रमे ।
मृत्युस्ते जात इत्युक्त्वा सोत्पपात नभस्थलम् ॥ २१॥

जातमात्रान् कुमारान् स निहन्तुं जनमादिशत् ।
हिंसाविहारा दुष्टास्ते निजघ्नुर्बालकान् भुवि ॥ २२॥

जगाम गोकुलं दुष्टा धात्री कंसस्य पूतना ।
कृष्णमादत्त सा हन्तुं तां जघान रमापतिः ॥ २३॥

शायितः शकटस्याधः शकटाक्षं जघान सः ।
अमीमरत्तृणावर्तं तेनोन्नीतः सलीलया ॥ २४॥

गर्गोऽथ शौरिणादिष्टः चकार क्षत्रियोचितान् ।
संस्कारान्नाम चामुष्य सबलस्य व्रजं गतः ॥ २५॥

प्राङ्गणे रिङ्गणं कुर्वन् अर्भकैः सह माधवः ।
लीलाभिर्भावगर्भाभिर्जनमानन्दयन्बभौ ॥ २६॥

जघास मृत्तिकां देवः कदाचिल्लीलया हरिः ।
मात्रोपालब्ध आस्ये स्वे व्याप्ते विश्वमदर्शयत् ॥ २७॥

दध्यमत्रं विभज्येशः कदाचिच्चन्द्रसन्निभम् ।
नवनीतं समादाय रहो गत्वा जघास च ॥ २८॥

जनन्योलूखले बद्धः सोऽर्जुनावुदमूलयत् ।
नलकूबरमणिग्रिवौ मोचयामास[2] शापतः ॥ २९॥

वृन्दावनमियासुः सन्नन्दसूनुर्बृहद्वने ।
ससर्ज रोमकूपेभ्यो वृकान् व्याघ्रसमान् बले ।
तत्रोत्पातभिया गोपा आपुर्वृन्दावनं वनम् ॥ ३०॥

---

[2] मोच्यित्वा च

स पालयन् गोपकबालवृन्दैः बलेनसाकं पशुवत्सयूथान् ।
निहत्य वत्सासुरमादिदेवो बकं च गोपालकतामवाप ॥ ३१॥

॥ इति श्रीमन्मणिमञ्जर्यां तृतीयः सर्गः ॥

## अथ चतुर्थः सर्गः

कृष्णायाः कालियं त्यक्त्वा पीत्वा दावाग्निमुल्बणम् ।
स विषद्रुममुच्छिद्य दैत्यान् गोवपुषोऽहनत् ॥ १॥

स सप्तोक्षवधाल्लेभे नीलां गोपालकन्यकाम् ।
बलेन धेनुकं हत्वा जघानान्यान् खरान् स्वयम् ॥ २॥

प्रलम्बे बलभद्रेण हते दावं पपौ पुनः ।
नन्दजो वज्ररक्षार्थं कृपासिन्धुर्हि माधवः ॥ ३॥

विप्रपत्नीभिरानीतं तद्गृहान्तिकमागतः ।
सोऽन्नं सानुचरो भुक्त्वा चक्रे तासामनुग्रहम् ॥ ४॥

मख[3]भङ्गरुषेन्द्रेणादिष्टैर्मेघैर्कृतां हरिः ।
वृष्टिं सोढुमशक्तान् स्वान् ररक्षोद्धृत्य पर्वतम् ॥ ५॥

आर्यानुग्रहसम्प्राप्तकामा गोपाङ्गनास्ततः ।
रमयामास गोविन्दश्चिरमैषीषु रात्रिषु ॥ ६॥

सुरूपीणां च गोपीनां मण्डले भगवान् स्वयम् ।
ननर्त वेणुना गायन् रासक्रीडामहोत्सवे ॥ ७॥

शङ्खचूडासुरं हत्वारिष्टं केशिनमप्यथ ।
मयपुत्रं पुनर्व्योमं स चक्रे व्रजरक्षणम् ॥ ८॥

कंसप्रेषितमक्रूरं दृष्ट्वा सम्भाव्य तं हरिः ।
तेन साकं ययौ देवो मधुरां बलसंयुतः ॥ ९॥

भङ्क्त्वा कंसधनुः शार्वं हत्वाम्बष्टं च वारणम् ।

[3] मह

चाणूरमुष्टिकौ हत्वा सबलः शुशुभे हरिः ॥ १० ॥

मञ्चस्थं मातुलं कंसं मूर्ध्नि सङ्गृह्य माधवः ।
निपात्य निष्पिपेषोच्चैर्धरिण्यां स ममार च ॥ ११ ॥

तद्बलं सकलं हत्वा जनान् सर्वाननन्दयत् ।
विमुच्य निगडादीशः पितरावभ्यवन्दत ॥ १२ ॥

पुत्रीवैधव्यसङ्क्रुद्धमभियान्तं जरासुतम् ।
सबलोऽभ्यर्दयत् कृष्णो हत्वा तत्सैनिकान् मुहुः ॥ १३ ॥

पाण्डुर्वने मृतः पार्था आनीता मुनिभिः पुरम् ।
पीड्यन्ते कुरुभिः स्वैरमित्याश्रावि मधुद्विषा ॥ १४ ॥

अक्रूरं प्रेषयामास कृशणो नागपुरं प्रति ।
कुरूणामनयं ज्ञात्वा धृतराष्ट्रमुवाच सः ॥ १५ ॥

तव पुत्रा न सन्त्येव भीमसेनाग्निभस्मिताः ।
इत्युक्त्वा भीमपार्थाभ्यां सहितः प्रययौ पुरीम् ॥ १६ ॥

पूजयन्तौ हरिं पार्थौ पूजितौ सर्वयादवैः ।
ऊषतुः सुचिरं तत्र भक्तिज्ञानामृताशनौ ॥ १७ ॥

उद्धवं प्रेषयामास व्रजशोकापनुत्तये ।
भगवान् मगधाधीशं पुनरभ्यर्दयद् युधि ॥ १८ ॥

स सृगालाधिपं हत्वा तत्पुत्रं पर्यपालयत् ।
इति चित्राणि कर्माणि चकार पुरुषोत्तमः ॥ १९ ॥

भीष्मकस्य सुतां देवीं रुक्मिणीमवहत्ततः ।
विज्ञानानन्दरूपिण्या स रेमे रमया तया ॥ २० ॥

लब्धं सत्राजिता सूर्यात् स सिंहापहृतं ततः ।
रत्नं जाम्बवता नीतं जाम्बवत्या सहानयत् ॥ २१ ॥

सत्राजिते ददौ रत्नं तेन दत्तां सरत्नकाम् ।
सत्यभामामुदवहत् सक्षाल्लक्ष्मीं परात्परः ॥ २२ ॥

हतवान् सानुजं हंसं कृष्णो रेमे स्वधामनि ।

पुत्रान् प्रद्युम्नसाम्बादीन् रुक्मिण्याद्यास्वजीजनत् ॥ २३॥

पाण्डवा द्रोणमासाद्य कृतशस्त्रास्त्रशिक्षणाः ।
सर्वविद्यातिशयिनो मुमुदुः कृष्णसङ्गताः ॥ २४॥

सम्भाविता भगवता पाण्डवाः स्नेहसम्भृताः ।
अनुज्ञाताः पुरं जग्मुः सदा तद्भक्तितत्पराः[4] ॥ २५॥

स्वामित्वेन सुहृत्वेन बन्धुत्वेन च पाण्डवाः ।
सुखित्वेन गतित्वेन तमेव शरणं ययुः ॥ २६॥

पुरान्निर्यापिता दुष्टैर्हिडिम्बं च बकं तथा ।
निहत्य पाण्डवाः प्रापुः कृष्णं कृष्णा[5]स्वयंवरे ॥ २७॥

लब्धकृष्णाननुज्ञाप्य पाण्डवान् स्वपुरं गतः ।
निहत्य शतधन्वानं पार्थानामन्तिकं ययौ ॥ २८॥

कारयित्वा हरिप्रस्थं तत्र पार्थान्निवेश्य सः ।
उपयेमे च कालिन्दीं द्वारकामाप माधवः ॥ २९॥

नीलां नग्नजितः पुत्रीं मित्रविन्दां पितृष्वसुः ।
भद्रां च कैकयसुतां लक्षणां स्वां च सोऽवहत् ॥ ३०॥

सोऽप्याश्चर्यतमो[6] धन्यो भौमं हत्वा दिवं गतः ।
अपाहरत् पारिजातं पराजित्य पुरन्दरम् ॥ ३१॥

महिषीणां सहस्राणि षोडशावहदच्युतः ।
शतं च तासु प्रत्येकं पुत्रा दशदशाभवन् ॥ ३२॥

द्यूते जिताः कृतारण्यवासा अज्ञातवासतः ।
पारङ्गता उपप्लाव्ये पार्थास्तं प्रति लेभिरे ॥ ३३॥

दौत्येन वञ्चयित्वारीन् प्रायो भीमेन सर्वशः ।
जघान कृतसारथ्यः कृष्णः पार्थानपाद्धरिः ॥ ३४॥

वायुर्वंशानिवान्योन्यं प्रतिघट्टनसम्भवैः ।

---

[4] तद्भावतत्पराः
[5] कृष्णां
[6] सोऽथ

वैरवैश्वानरज्वालैः सञ्जहार हरिर्यदून् ॥ ३५ ॥

उद्धवं सनकादींश्च दुर्वासप्रभृतींश्च सः ।
न्ययुङ्क्त सर्ववेदान्तवर्तने सहशिष्यकान् ॥ ३६ ॥

एवं चित्रचरित्रस्तु कृष्णोऽनुज्ञाप्य पाण्डवान् ।
रूपेणैकेनास भूमावेकेन स दिवं ययौ ॥ ३७ ॥

एवं कृष्णसहायास्ते पार्था दुर्योधनादिकान्[7] ।
श्रीकृष्णद्वेषिणो हत्वा सकृष्णाः कृष्णमन्वयुः ॥ ३८ ॥

अथाभिमन्योस्तनयः परीक्षिद्राजा सवज्रो जगतीं विजित्य ।
सर्वात्मभावं परमे दधानः साम्राज्यलक्ष्मीमुपलभ्य रेमे ॥ ३९ ॥

॥ इति श्रीमन्मणिमञ्जर्यां चतुर्थः सर्गः ॥

## अथ पञ्चमः सर्गः

ततः परमहंसा ये कृष्णभीमानुशिक्षिताः ।
व्यासाश्रयादत्रिजाद्या वेदशास्त्राण्यवर्तयन् ॥ १ ॥

कृष्णे भीमे च विद्वेषमधिकं दधतोऽसुराः ।
भग्नबाहुबला ईषुर्वाग्युद्धैस्तत्वविप्लवम् ॥ २ ॥

रहःसम्भूय ते सर्वे (ऽ)बुद्धिमन्तो न्यमन्त्रयन् ।
स्वकार्यसिद्धयेऽन्योन्यं यथा (ऽ)प्रज्ञाविजृम्भणम् ॥ ३ ॥

शकुनिर्द्वापरः स्माह वचस्तत्त्वार्थबृंहितः ।
लोकायततनूजेन चाणक्येन[8] प्रचोदितः ॥ ४ ॥

दुर्धर्षो भीमसेनो नः कृष्णोऽप्यत्यन्तदुःसहः ।
ताभ्यां निरीक्षिता दैत्या मृत्युं यान्ति न संशयः ॥ ५ ॥

कृष्णो दैवं गुरुर्भीमो वेदविद्या च पार्वती ।
तस्या उत्सादनेनैव यातस्तावतिसङ्कटम् ॥ ६ ॥

---
[7] क्रोधवशादिकान्
[8] बाणाख्येन

तस्माज्जनेषु विद्वत्सु वेदव्याख्यानशालिषु ।
प्रविश्योत्साद्यतां विद्या कैश्चिदुत्पद्य भूतले ॥ ७ ॥

विपरीतानि शास्त्राणि कर्तव्यानि बहून्यपि ।
असत्तर्कैः कुतर्कैर्वा[9] वेदविद्यानिरस्यताम् ॥ ८ ॥

वेदशास्त्रान्ननो भीतिरस्ति कार्यान्तरस्पृहाम् ।
लोकायतमतं मानहीनं नाद्रियते जनैः ॥ ९ ॥

अक्षपादः कणादश्च कपिलश्चापरो जनः[10] ।
शास्त्रान्तराणि कृत्वापि वेदद्वेषं न कुर्वते ॥ १० ॥

हरेण निहताः पूर्वं त्रैपुरा असुराः पुनः ।
जाताः संसर्गदोषेण पामराः श्रद्धधुस्त्रियाम् ॥ ११ ॥

वेदोऽप्रमाणमित्युक्त्वा बुद्धस्तानप्यमोहयत्[11] ।
बौद्धशास्त्रं ततस्तेनुरज्ञात्वा तन्मतं परम् ॥ १२ ॥

निराश्रमान् दुराचारान् प्रत्यक्षं द्विषतः श्रुतीः ।
ब्राह्मणा गर्हयन्त्येतान् वेदबाह्यानकौशलान् ॥ १३ ॥

जैनपाशुपताद्याश्च लोकविद्वेषगोचराः ।
वेदविद्वेषिणोऽप्येते तत्रोपायं न जानते ॥ १४ ॥

सर्वान् वेदान् द्विजो भूत्वा श्रितः परममाश्रमम् ।
वेदान्तिव्यपदेशेन निरस्यन्नः परः सुहृत् ॥ १५ ॥

अस्मिन् कार्ये विदग्धोऽयं मणिमानेव दृश्यते ।
आदेष्टव्योऽमुना राज्ञा कलिना कार्यसिद्धये ॥ १६ ॥

एवमुक्ता द्वापरेण कलिपूर्वाः सुरद्विषः ।
हृष्टा आहूय सम्भाव्य मणिमन्तं बभाषिरे ॥ १७ ॥

याहि भ्रातर्नमस्तुभ्यमुत्पद्यस्व महीतले ।
विद्यावेदपुराणाद्याः भृशं विप्लावय द्रुतम् ॥ १८ ॥

[9] असत्तर्कैश्च सत्तर्कैः
[10] जडः
[11] हि व्यमोहयत्

विदूषय गुणान् विष्णोर्जीवैक्यं प्रतिपादय ।
भूमौ वृकोदराभावान्नाशङ्कां कर्तुमर्हसि ॥ १९ ॥

अस्मासु बद्धवैरः सन् स्वस्थोऽप्यस्वस्थतां गतः ।
अनुज्ञाभावतो विष्णोर्नाधुनावतरत्ययम् ॥ २० ॥

वंश्यास्तु सनकादीनामधुना यतयो भुवि ।
एकदण्डास्त्रिदण्डाश्च वर्तन्ते तदनुव्रताः ॥ २१ ॥

परतीर्थाभिधस्तत्र यतिरेको महातपाः ।
तमाश्रित्य प्रवर्तस्व ततः सम्भाव्यसे जनैः ॥ २२ ॥

वेदान्तसूत्रैरस्माकं मतमैकात्म्यगोचरम् ।
वितत्य सकलान् वेदानतत्वावेदकान् वद ॥ २३ ॥

जीवेभ्योऽन्यो हरिर्ब्रह्म स्रष्टृत्वादिगुणान्वितः ।
इति वेदान्तसूत्राणां हृदयं च तिरस्कुरु ॥ २४ ॥

अस्मदावेशबलतः कलेः शक्त्या च पीडिताः ।
भवन्ति मलिनात्मानः सज्जनाः साङ्ख्ययोगिनः ॥ २५ ॥

मिथ्यावादं ततस्तेऽपि केचिच्छ्रद्दधतेऽपरे ।
उदासते निराकर्तुं केचिदेव समीहते ॥ २६ ॥

अभिप्रायात् कर्मतो वा केचिदस्मज्जना भुवि ।
जाता अन्ये जनिष्यन्ते निःसहायो न जायसे ॥ २७ ॥

इति दैत्यैः समादिष्टो मणिमान् भीमभीमताम् ।
मनसा शङ्कमानोऽपि भुव्युत्पत्तुं मनो दधे ॥ २८ ॥

तत्काले शाक्यशास्त्रेण विस्तृता सकला मही ।
वैदिकाश्रमधर्मादेः पराभूतिरभूत्ततः ॥ २९ ॥

इन्द्रजालैर्वशीकृत्य राजानं सौगतं प्रति ।
शून्यं तत्वं च संश्राव्य सतस्तेनोदसादयन् ॥ ३० ॥

ततो गोविन्दनामाभूद्दि्वजो विद्याविशारदः ।
स चतुर्वर्णजाः कन्या ऊढ्वा पुत्रानजीजनत् ॥ ३१ ॥

शबरो विक्रमादित्यो  हरिश्चन्द्रोऽथ भर्तृहृत् ।
इत्येते कोविदा आसन् धृतवर्णाश्रमव्रताः ॥ ३२॥

गोविन्दो दारपुत्राद्यं विहायाथाचरन्महीम् ।
व्यधत्त शबरो भाष्यं सूत्राणां  जैमिने रहः ॥ ३३॥

क्ष्मामपाद्विक्रमादित्यो हरिश्चन्द्रः सुरोत्तमान् ।
इष्ट्वायुर्वेदवशितामलभिष्ट परं वरम् ॥ ३४॥

गत्वा यज्ञभुवं भर्तृहरिर्विप्रानुमोदितः ।
विचार्य यज्ञहृदयं स चचार महीमिमाम् ॥ ३५॥

आर्यस्य वेदविदुषः प्राभूतां तनयावुभौ ।
भट्टः कुमारः प्रथमः भट्टनारायणः परः ॥ ३६॥

कुमारस्तु तदा भेजे बौद्धं तन्मतवित्तये ।
नारायणेन सम्मन्त्र्य सम्प्राप्ते धर्मसङ्कटे ॥ ३७॥

प्रासादाग्रे च शाक्यस्य भट्टोऽभ्यज्ञयिता पदे ।
वेदविप्लवनव्याख्यां श्रुत्वाश्रूणि न्यपातयत् ॥ ३८॥

तदुष्णिमानुमानेन विप्रस्याधिं विबुद्ध्य सः ।
हन्यतां हन्यतामेषः छद्मात्मेति जगाद च ॥ ३९॥

तदानीं हन्तुकामेऽस्मिन् न्यपतद्धरणीतले ।
भट्टो वेदाः प्रमाणं चेज्जीवामीति वचोऽब्रुवन् ॥ ४०॥

शङ्कुवेधेन तस्यैकं चक्षुर्नष्टं ततोऽभवत् ।
वेदप्रामाण्यसन्देहात् काणोऽसीत्यशरीरवाक् ॥ ४१॥

कदाचित्तं रहो राजा समाहूयेदमब्रवीत् ।
देवताजनसम्भाव्यं मतं किंस्विद् द्विजेन्द्र ते ॥ ४२॥

इत्युक्तः स महीभर्त्रा भट्टः स्माहाविशङ्कितः ।
वर्णाश्रमोचिता धर्मा न हातव्या मुमुक्षुभिः ॥ ४३॥

वेदाः प्रमाणमित्यस्मन्मतं देवानुशिक्षितम् ।
हातव्यं गतिमिच्छद्भिः पुरुषैः सौगतं मतम् ॥ ४४॥

यदि प्रसीदसि क्ष्मेश सौगतान् विजयामहे ।
प्रवेशय न चेदस्मान् वह्नावह्नाय निश्चयात् ॥ ४५॥

इति भट्टवचः श्रुत्वा विस्रम्भेणाब्रवीन्नृपः ।
यदि जेष्यसि तान् वह्नौ वेशये सौगतानिति ॥ ४६॥

तस्य राज्ञो वचः श्रुत्वा विस्रब्धः स महीसुरः ।
सनारायणभट्टः सशबरो मुमुदे भृशम् ॥ ४७॥

अपक्षपातिनि क्षत्रे स टीकां तर्ककर्कशाम् ।
चक्रे शबरभाष्यस्य बौद्धशास्त्रनिकृन्तनीम् ॥ ४८॥

नारायणेन भट्टेन स कदाचित् समेयिवान् ।
तोरणाग्रे पुरद्वारि पत्रिकामप्यपातयत् ॥ ४९॥

वह्निप्रवेशग्लहया कुमारो वितण्डया माध्यमिकान्निगृह्य ।
नष्टायुषोऽपह्नवतः श्रुतीनामह्नाय वह्नौ गमयाञ्चकार ॥ ५०॥

सायंत्रिकैः सह ययुः कतिचिन्निलीनाः
सम्प्राप्तभुक्तिभुवि केचन बङ्कमुख्याः ।
वेषान्तरेण कृतसौगतलिङ्गभङ्गा
राज्यान्तवर्त्मसु गताः सुगताः विचेरुः ॥ ५१॥

॥ इति श्रीमन्मणिमञ्जर्यां पञ्चमः सर्गः ॥

## अथ षष्ठः सर्गः

उदजृम्भन्त वेदान्ता धर्मा वर्णाश्रमोचिताः ।
ब्राह्मणास्तुतुषुर्यज्ञाः प्रावर्तन्त महीतले ॥ १॥

विमृश्य भारविर्भाट्टं समुदासे निरीश्वरम् ।
शुश्राव तन्निराकर्तुं मात्सर्येण प्रभाकरः ॥ २॥

माघो वररुचिर्बाणो मयूरः कालिदासकः ।
प्रचण्डकोविदा दण्डिमुख्याश्चैतदुदासत ॥ ३॥

डम्बकस्तर्कवित्तन्त्री प्रभाकृत्तर्कतन्त्रवित् ।
मण्डनो रेफणश्चैते भट्टाज्ञाट्टमशृण्वत ॥ ४ ॥

ततः प्राभाकरं चक्रे व्यर्थयुक्तिः प्रभाकरः ।
भट्टसम्रब्धमात्सर्यो बहुतन्त्रप्रपञ्चनम् ॥ ५ ॥

तमेव समयं दैत्यो मणिमानप्यजायत ।
मनोरथेन महता ब्राह्मण्यां जारतः खलात् ॥ ६ ॥

उत्पन्नः सङ्करात्मायं सर्वकर्मबहिष्कृतः ।
इत्युक्तः स्वजनैर्माता सङ्करेत्याजुहाव तम् ॥ ७ ॥

विश्वस्ता स्वसुतं दृष्ट्वा तुष्टा सा पोषयत्क्रमात् ।
मण्डोदुम्बरनिष्पावैः शिग्रुशाकैरलाम्बुभिः ॥ ८ ॥

पञ्चषाण्यानय क्षिप्रं वृन्ताकानीति चोदितः ।
मात्रा सञ्जग्मिवान् बालो वृन्ताकस्तम्बसञ्चयम् ॥ ९ ॥

गणयामास वृन्ताकमेकमेकमिति स्फुटम् ।
एकत्वसङ्ख्यया चात्र न द्वितीयमवैक्षत ॥ १० ॥

तदाह मातरं पुत्रो नेक्षे वृन्ताकयोर्द्वयम् ।
पञ्चषाणि कथं तानि त्वानयेयं तरामिति ॥ ११ ॥

पथिकास्तदुपश्रुत्य प्रहस्य मिथ ऊचिरे ।
एकस्मिन् द्वित्वसङ्ख्यां तु कः पश्यति तरामिति ॥ १२ ॥

उपनीय द्विजः कश्चिद् वाचाटं निपुणं वटुम् ।
सुभिक्षान्नघृतक्षीरं सौराष्ट्रमनयत्ततः ॥ १३ ॥

प्राग्भवे सुचिरं चीर्णतपस्तुष्टस्य शूलिनः ।
वरप्रसादतः शीघ्रमध्यगीष्टागमान् वटुः ॥ १४ ॥

ततः सौमीं दिशं यातो नदीं तर्तुमवातरत् ।
तस्या ओघैर्हृते ब्रह्मसूत्रे तामुत्ततार सः ॥ १५ ॥

मं त्वं त्यजसि चेत्सूत्रं त्वां प्रागेवाहमत्यजम् ।
अकर्मणस्त्वया किं म इत्युक्तः स ययौ द्रुतम् ॥ १६ ॥

दुर्वाससः परं शिष्यं परतीर्थाभिधं यतिम् ।
चातुर्मास्यव्रतधरमपश्यत् कापटो वटुः ॥ १७॥

निःसूत्रं तं वटुं दृष्ट्वा महादानवलक्षणम् ।
विद्वानवाङ्मुखो भूत्वा स आचम्य मठं ययौ ॥ १८॥

दोषज्ञं तं मुनिं ज्ञात्वा तीर्त्वा गोदावरीं ययौ ।
बदर्यां परतीर्थार्यशिष्यं प्राप्येदमब्रवीत् ॥ १९॥

त्वद्गुरोरस्मि शिष्योऽहं तदादेशादिहागतः ।
इत्युक्तवति तस्मिन् स विस्रंभं नैव जग्मिवान् ॥ २०॥

सत्यप्रज्ञो वटुं भक्तिवैराग्यादिगुणोज्झितम् ।
दुष्टं विज्ञाय तत्याज जुगुप्सां परमां गतः ॥ २१॥

अतीतजन्मसंस्कारवशादैकात्म्यभावनाम् ।
चकार शून्यभावेन निर्गुणत्वेन वा क्वचित् ॥ २२॥

सहायं मार्गयामास दुष्टपक्षैकदीक्षितः ।
एकाकी मलिनो मुण्डस्तत्र तत्र परिभ्रमन् ॥ २३॥

कदाचिन्निशि सङ्गत्य दैत्यास्तं समभावयन् ।
ऊचुश्च सङ्कराचार्य त्वमस्माकं परा गतिः ॥ २४॥

तुभ्यं मनस्विने भूयः स्वस्ति पादतलोटज ।
साधकं प्रत्ययामस्त्वामासुर्याः कार्यसम्पदः ॥ २५॥

पुरा भट्टभयाच्छाक्या नष्टा द्वीपान्तरं गताः ।
नारायणोऽन्वगात्तेषां ततोऽप्युत्सादनेच्छया ॥ २६॥

तत उत्साद्य तान् भट्ट आयातमनुजं निजम् ।
दुष्टदेशे चिरावासान्नग्रहीद्दोषशङ्कया ॥ २७॥

ततः स सौगतमतं पुनः किञ्चिदुदग्रहीत् ।
बक्कस्वामी ततो द्वीपादाजगामातिशङ्कितः ॥ २८॥

कुमारः स्वमृतिं लोके ख्यापयामास शिष्यकैः ।
नारायणस्तु तच्छ्रुत्वा शोकात् पावकमाविशत् ॥ २९॥

आपणेषु ततो बङ्कः प्रावर्तयत सौगतम् ।
मतं लिङ्गान्तरधरैर्जनैः केरलजन्मभिः ॥ ३०॥

गौडपादस्ततो न्यासमियेष प्रवयास्तदा ।तच्छ्रुत्वा यतिरूपेण बङ्को गत्वा तमब्रवीत् ॥३१॥

सनत्कुमारो भगवान् प्रेषयामास मां तव ।
मोक्षप्रवर्तनायैव द्वैतभावेन किं फलम् ॥ ३२॥

इत्युक्तो गौडपादस्तु सम्भ्रमेण ननाम तम् ।
विप्रस्तुर्याश्रमं प्राप्य तत्त्वं शुश्राव बङ्कतः ॥ ३३॥

तद्विवर्तप्रपञ्चोऽयं बाध्यते ज्ञानसम्पदि ।
ज्ञानं तु तप्तलोहाप्तजलन्यायेन शाम्यति ॥ ३४॥

यथा प्रत्याययत्येते सर्वं बाधोपलक्षणम् ।
ततस्त्वमन्यथा तत्त्वं सोऽहमित्यूहमर्हसि ॥ ३५॥

इति बङ्कोदितं तत्त्वं विचार्य सुचिरं द्विजः ।
सर्वभावं निर्विशेषं विना नान्यदवैक्षत ॥ ३६॥

गोविन्दस्तं समासाद्य ततः संन्यासमाचरत् ।
सम्प्रदायगतं तत्त्वं श्रुत्वोपास्त यथार्थतः ॥ ३७॥

गोविन्दस्वामिनं साधुं तं गुरुं समुपैहि भो ।
ततो दण्डादिकं प्राप्य शृणु त्वं तत्त्वमुत्तमम् ॥ ३८॥

मनः प्रविश्य सर्वेषां त्वं वयं रोचयामहे ।
विष्णोर्विदूषय गुणानित्युक्त्वा ययुरासुराः ॥ ३९॥

वटुः शठः स गोविन्दस्वामिनं प्रैक्षत क्वचित् ।
भूयासं भवतः शिष्यो न मेऽन्यस्त्वादृशो गुरुः ॥ ४०॥

इत्यूचिवांसं गोविन्दः स तं पर्यग्रहीदद्भुतम् ।
प्रच्छाद्य शून्यवादित्वं वेदान्तिव्यपदेशतः ॥ ४१॥

वर्तयामो मतं स्वीयमन्यथा गर्हयन्ति नः ।
तदर्थं सूत्रहृदयं ब्रह्मदत्ताच्छृणोम्यहम् ॥ ४२॥

इति गोविन्दमाभाष्य मायी सिद्धान्तिनं ययौ ।

प्रभाकरकुमाराभ्यां साकं भास्करसंयुतः ॥ ४३॥

शुश्राव सूत्रभावं स ब्रह्मदत्तात्त्रिदण्डिनः ।
शिष्यास्ते प्रययुः सर्वे विभिन्नमतयो मिथः ॥ ४४॥

भाट्टं शिष्येषु विन्यस्य भट्टो दैवमसेवत ।
गुरुः प्राभाकरं तेने भारवेरनुजः शठः ॥ ४५॥

सूत्रैः प्रपञ्चयाञ्चक्रे मायावी सौगतं मतम् ।
शून्यं ब्रह्मपदेनोक्त्वा तथाविद्येति संवृतिम् ॥ ४६॥

सत्वादिधर्मराहित्यं शून्यतायै जगाद सः ।
सूत्रमुद्धृत्य सिद्धान्तमुत्सूत्रैः स्वीयमुच्चकैः ॥ ४७॥

आभाष्य बहुभिः शब्दैः कथं वेदान्तितामियात् ।
अतत्वावेदकाः प्रायो वेदाः केचिन्निरर्थकाः ॥ ४८॥

इति वेदान्तवादः स्यात्कथं वादस्तदन्तकः ।
कर्णौ प्यधत्त सिद्धान्ती भाष्यं तच्छुश्रुवान् मनाक् ॥ ४९॥

भास्करः कर्कशैस्तर्कैर्दुर्भाष्यं तदखण्डयत् ।
दुःशास्त्रमपठन् दैत्यास्तत एव हरिद्विषः ।
असुरावेशिनः सर्वे सङ्करस्य वशं गताः ॥ ५०॥

वशीचिकीर्शुर्निखिलांश्च जन्तून् सवर्त्मबाह्यानपि हन्तुमिच्छन् ।
शाक्तेयमन्त्रानभजत्स मायी सा भैरवी तस्य चकार दौत्यम् ॥ ५१॥

॥ इति श्रीमन्मणिमञ्जर्या षष्ठः सर्गः ॥

## अथ सप्तमः सर्गः

ततः स विश्वरूपस्य गृहं वव्राज सङ्करः ।
किमप्यबोधतापाङ्गवीक्षया तत्प्रियाऽमुना ॥ १॥

जघटाते तयोर्मङ्क्षु चेतसी त्वितरेतरम् ।
निलीनोऽध्वनयद्भिक्षुर्निशीथे प्राङ्गणाद्बहिः ॥ २॥

निर्यये ऽकालकूश्माण्डपातकातरया किल ।
तया किञ्चित्परिगते निद्रया निजभर्तरि ॥ ३ ॥

बृहत्तमोद्धताङ्गेन स्फारस्फिङ्मसृणत्वचा ।
तेन दुर्भिक्षुणोत्तुङ्गजघनस्तनयाऽरमि ॥ ४ ॥

पत्युरेत्य शनैर्नारी समीपेऽशेतविक्लवा ।
कूश्माण्डकथया चैनं प्रबुध्यतमबोधयत् ॥ ५ ॥

ततः प्रातर्विवादेच्छुः सङ्करो विप्रमब्रवीत् ।
जल्पावः प्राश्निकत्वेऽसौ कल्प्यतां दयिता तव ॥ ६ ॥

स आश्रमान्तरं प्रायाद्यः पराभवमेष्यति ।
इत्युक्त्वा तेन सोऽजल्पत्सा पतिं जितमब्रवीत् ॥ ७ ॥

ततः पर्यव्रजद्विप्रस्तया रेमे च सङ्करः ।
क्वचित्तेनासुरेशेन पर्यपश्यत्स मण्डनः ॥ ८ ॥

यो भट्टेन पराभूतो बहुशास्त्राणि शुश्रुवान् ।
निर्ययौ वारणारूढः सन्तं सङ्करमब्रवीत् ॥ ९ ॥

कुतो मुण्ड इति प्राह आगलान्मुण्ड इत्यमुम् ।
मण्डनस्त्वाह पन्थानं पृच्छामीत्यथ सोऽब्रवीत् ॥ १० ॥

किमाह पन्था इति ते माता रण्डेति मण्डनः ।
स्माह तं भिक्षुकः सत्यमाह पन्था इति च्छलम् ॥ ११ ॥

निगृहीतेऽप्रतिभया भैरव्या कुक्कुटेन च ।
क्षोभितो ब्राह्मणः शीघ्रमन्ववर्तत भिक्षुकम् ॥ १२ ॥

तोटकः पद्मपादश्च ज्ञानोच्चो बीजभुक् तथा ।
इत्येते मायिनः शिष्या आसंश्चत्वार उल्बणाः ॥ १३ ॥

सिद्धित्रयमकार्षुस्ते शिष्या ज्ञानोत्तमादयः ।
तोटकादीनि चत्वारि तामसाख्यनिरर्गलम् ॥ १४ ॥

तेषां शिष्यप्रशिष्याद्या यत्याभासास्चतुर्विधाः ।
अबृंहयत वंशान् स्वान् न्यसयन्तः पृथग्जनान् ॥ १५ ॥

दक्षिणाशां ततो गत्वा दग्ध्वा मातुः कलेवरम् ।
आगत्य स्वमठं प्राप्य सङ्करो रोगपीडितः ॥ १६ ॥

ततः काले समायाते श्वासज्वरभगन्दरैः ।
दुःखाद्यैः पीडितस्यास्य वाणी किञ्चिदलीयत ॥ १७ ॥

मुमूर्षुं स्वगुरुं दृष्ट्वा मायिनो वेदविद्विषः ।
भगवान् नः परं कृत्यं किमपृच्छन्ससम्भ्रमः ॥ १८ ॥

स स्माह तान् कृतप्रायं सत्यं कृत्यं महासुरः ।
उत्साद्यतामथ क्षिप्रं परतीर्थार्यशिष्यकाः ॥ १९ ॥

परतीर्थः प्रकृत्यैव शापानुग्रहशक्तिमान् ।
तीव्रतकैंस्तपोभिश्च प्रवया अत्यजत्तनुम् ॥ २० ॥

सत्यप्रज्ञो दुराधर्षः शक्तोऽपीह हरिद्विषाम् ।
ऋषिभ्यो हिमवत्पृष्ठे श्रुतीर्व्याख्यात्यगोचरः ॥ २१ ॥

तच्छिष्यो निपुणःशान्तो वेदवेदान्तकोविदः ।
श्रुतीर्व्याख्याति शिष्येभः पञ्चषेभ्यस्तपोमयः ॥ २२ ॥

नान्योऽस्ति सम्प्रदायज्ञः श्रुतेर्दैतेयपुङ्गवाः ।
एत्य हंसानिमान् क्षिप्रमुत्सादयत निर्भयाः ॥ २३ ॥

आदिश्येत्थं बलवतः शिष्यानन्यान्महासुरान् ।
आहूय चतुरो दैत्यानाहान्तेवासिनोऽसुरः ॥ २४ ॥

बीजादं शृणुतास्माकमेष्यन्तं भवसङ्कटम् ।
इत्युक्तास्ते दशदिशः परिभ्रम्य समागताः ॥ २५ ॥

किमपश्यत बीजादः किमवोचत्स मे गतिम् ।
इत्युक्तास्ते स्वगुरुणा रहस्तं प्रत्यचक्षत ॥ २६ ॥

गुरोः का नो गतिरिति दृष्टं दृष्टं नरं प्रति ।
विचार्याप्युत्तरं नाप्तमित्येकः पुनरब्रवीत् ॥ २७ ॥

द्वयं सङ्करस्यास्ति पद्मस्य चैकं ममैकं च नैकं नैकं च नास्ति ।
गिरेत्येतया कन्दुकक्रीडमेकमवेक्ष्येऽन्त्यजं पङ्कणान्ते क्वचेति ॥ २८ ॥
हा हा बीजादैष गूढो मदीयो भूयस्तात व्यापृतोऽहं गुणेषु ।

किं वास्माकं भावि का वा गतिः स्यादित्थं जल्पन्नाप दीर्घां स निद्राम् ॥ २९ ॥

॥ इति श्रीमन्मणिमञ्जर्यां सप्तमः सर्गः ॥

## अथ अष्टमः सर्गः

मायाविना समादिष्टा मूर्खाः पत्तलजन्मना ।
नन्दिग्रामं समासाद्य हंसानामदहन्मठम् ॥ १ ॥

निजघ्नुर्गोव्रजं ग्रामे भैरव्या बालकानपि ।
विप्रानज्वरयन् दैत्या अबला उदसादयन् ॥ २ ॥

प्राज्ञतीर्थः सशिष्योऽसौ छिन्नदण्डकमण्डलुः ।
उद्दिश्य प्रस्थितः प्रातः सत्क्षेत्रं पौरुषोत्तमम् ॥ ३ ॥

मायिनस्ताननुद्धृत्य हंसाग्र्यान् विजने स्थले ।
अभिहत्य निपात्योचुः सम्प्राप्तप्राणसङ्कटान् ॥ ४ ॥

अस्माननुव्रजध्वं वा म्रियध्वं वा विचिन्त्यताम् ।
इत्युक्ता मायिभिर्मूर्खैरन्वयामेति तेऽब्रुवन् ॥ ५ ॥

अथ ज्ञानोत्तमस्तेभ्यो दत्वा दण्डादिकं खलः ।
व्यत्यस्य लाञ्छनं चोपदिदेशाकूतमासुरम् ॥ ६ ॥

तेभ्यस्ते निपुणा हंसाः परमा गूढचेतसः ।
श्रुत्वा शारीरकं भाष्यं व्याचख्युस्तर्ककर्कशाः ॥ ७ ॥

मायिनो वञ्चयित्वैवं सन्तोषविवशाशयान् ।
आनन्दबालमठगान् न्यवसन् सह ते अमी ॥ ८ ॥

विश्वस्य प्राज्ञतीर्थार्यमैकात्म्योपास्तिनिष्ठितम् ।
मायावादरतं दृष्ट्वा मायिनो जहृषुर्मुदा ॥ ९ ॥

तं सशिष्यं सदाचारमवलोक्याथ मायिनः ।
पानभोगाबलाकाङ्क्षा विहाय प्रययुः शनैः ॥ १० ॥

अयं हि प्राज्ञतीर्थार्यः सदाचारातिकर्कशः ।

गुरूनस्मान्दुराचारान् गर्हयेदिति भीरवः ॥ ११॥

प्राज्ञतीर्थस्तदा शिष्यान् हंसानाहूय सम्मतान् ।
रहस्याह महानेष हरिणानुग्रहः कृतः ॥ १२॥

बर्बरा मायिनः सर्वे ययुर्विश्वस्य नः सुखम् ।
पारयित्वा चतुर्मासव्रतं यामो वयं त्विति ॥ १३॥

गत्वा गङ्गां ततः स्नात्वा मुक्त्वाऽहो मायिसम्भवम् ।
मायिव्याजेन यास्यामो नन्दिग्रमं शनैः शनैः ॥ १४॥

इत्युक्त्वा प्राज्ञतीर्थार्यश्चातुर्मास्यादनन्तरम् ।
गत्वा सशिष्यो गङ्गायां स्नात्वायादुत्तरां दिशम् ॥ १५॥

नन्दिग्रामं समासाद्य हरिं संस्मार्य सज्जनान् ।
निरोगानकरोदार्या रहो नाथमसेवयत् ॥ १६॥

प्राज्ञतीर्थश्च तच्छिष्या भक्त्या सम्भाजिता जनैः ।
बदर्यां मुनयः स्नात्वा तीर्थे तीव्रं तपोऽचरन् ॥ १७॥

नारायण नमस्तुभ्यं नमो वस्तात्त्विकाः सुराः ।
हा हा नः सुगतिं देहि गुरो नाथेति चक्रुशुः ॥ १८॥

तेषामाविरभूत्सत्यप्रज्ञः साकं महर्षिभिः ।
तस्मै हंसा द्रुतं नेमुः सर्वे ते दैत्यपीडिताः ॥ १९॥

क्रदन्तः पतितान् भूमौ सत्यप्रज्ञो महत्तपाः ।
आज्ञायोत्थापयामास जनांस्तेषां महद्भयम् ॥ २०॥

उपविश्यासने तस्मिन्नुपवेश्य च तान् मुनीन् ।
उवाचाहं भयं वेद्मि भवतां तपसाखिलम् ॥ २१॥

अयं कालः कलेः साक्षात् तेन चोपद्रुता जनाः ।
वत्सा विमुञ्चतात्युग्रं तत्वविप्लवसङ्कटम् ॥ २२॥

तवामी प्राज्ञतीर्थान्तेवासिनः पौरुषोत्तमे ।
क्षेत्रे यान्तु परां सिद्धिमुपास्य पुरुषोत्तमम् ॥ २३॥

शिष्येष्वेकः श्रुतीनां ते सम्प्रदायाभिगुप्तये ।

चरतां मायिभिः सार्धं तेषां छन्दानुवर्तनैः ॥ २४ ॥

संन्यासयेत्स निपुणमेकं वंशधरं द्विजम् ।
सोऽप्यन्यमन्यं सोऽपीति वंशो न स्यादखण्डितः ॥ २५ ॥

नारायणः परः स्वामी सत्यज्ञानादिसद्गुणः ।
तस्य दासोऽस्म्यहं सत्यमित्युपासा प्रवर्तताम् ॥ २६ ॥

मायिनां लाञ्छनं धार्यं कार्यं तन्नमनादिकम् ।
स्मृत्वा हरिं तदन्तस्थं मायावादश्च पठ्यताम् ॥ २७ ॥

महासुरमये लोके नैवाविष्कर्तुमर्हसि ।
भैरव्या वा कृपाण्या वा मायिनो घ्नन्ति वैदिकान् ॥ २८ ॥

तेभ्यो गोपायतात्मानं सम्प्रदायं न मुञ्चत ।
इत्युक्त्वा सत्यसंवित्तं त्याज्यं दण्डपटादिकम् ॥ २९ ॥

मायिदत्तं पुनस्तेभ्यो दण्डाद्यं पूर्ववद्ददौ ।
ताननुज्ञाप्य सत्यात्मा पूर्ववत् स तिरोदधे ॥ ३० ॥

प्राज्ञशिष्या ययुः क्षेत्रं विरक्ताः पौरुषोत्तमम् ।
प्राज्ञो गुरूपदिष्टेन मार्गेणोवास मायिभिः ॥ ३१ ॥

एकं वंशधरं शिष्यं कृत्वोपास्तिमशिक्षयत् ।
अन्यं संन्यस्य सोऽपि स्वं सम्प्रदायमशिक्षयत् ॥ ३२ ॥

सोऽप्यन्यमित्ययं वंशो नोदच्छिद्यत भाग्यतः ।
ततः केवलवंशेऽस्मिन् मायिभिः स्वजनभ्रमात् ।
गृह्यमाणोऽच्युतप्रेक्षः पारिव्राज्यमुपागमत् ॥ ३३ ॥

अथासुराणां श्रुतिदूषकाणां उत्सादनायार्थयतः सुरेन्द्रान् ।
आनन्दयन् श्रीदयिताज्ञयेशः सञ्जीवनात्मावततार भूमौ ॥ ३४ ॥

स भगवानुपनीतिमितः पितुः सकलदेवसुलक्षणशिक्षणः ।
अधृत पारमहंस्यमथाश्रमं यतिवरात्परमच्युतचेतसः ॥ ३५ ॥

प्रवर्तिता या सनकादिभिः पुरा ततः परस्तात्परतीर्थशिष्यकैः ।
हरेरुपास्तिं स्वगुरुप्रसादितां मध्वाय भक्त्योपदिदेश हंसराट् ॥ ३६ ॥

गुणाननन्तानुपसंहरन् हरेरनन्तरूपेषु दुरन्तसन्ततेः ।
अनन्तरूपो भगवाननन्तधीरुपास्त शर्वादिसुपर्वणां गुरुः ॥ ३७॥

दस्योर्मणिमत उदितं दुर्भाष्यं व्यस्य मध्व आराध्यः ।
वेदान्तसूत्रभाष्यं सकलश्रुतितर्कबृंहितं चक्रे ॥ ३८॥

ततान तन्त्रश्रुतिगीतिकानां भाष्याणि वेदेश्वरचक्रवर्ती ।
पुराणरामायणभारतानां चकार तात्पर्यविनिर्णयं च ॥ ३९॥

तार्किकद्विरदपुञ्जभञ्जने मध्वकेसरिणि हन्त जृम्भिते ।
सङ्कटेन च भयेन मायिगोमायवो दशदिशः पराद्रवन् ॥ ४०॥

व्यदोतिष्ठ विचित्रवृत्तरचितः सम्पूर्णविद्याकरः
कृष्णस्याद्भुतवीर्यवर्णनपरो नानार्थसङ्घोज्वलः ।
शर्वेन्द्रादिसुवन्द्यलालितपदो मायाविनां भीषणः
श्रीमध्वो विजयी च मध्वविजयो नारायणप्रोद्भवः ॥ ४१॥

॥ इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतश्रीमन्-

नारायणपण्डिताचार्यविरचितायां श्रीमन्मणिमञ्जर्यां अष्टमः सर्गः ॥

। भारतीरमणमुख्यप्राणान्तर्गतश्रीकृष्णार्पणमस्तु ।